र्निहितमाकर्ण्य श्रुत्वा व्याकुलेन विशेषेण आकुलेन पक्षे
राजा कपिध्वजः सौभद्रस्य भद्रायाः पुत्रमभिमन्युं दूषणा
र्थं अर्थात्कस्यापि यस्य आननं प्राणानं यस्य यतो सतया पोषं
समानम् ॥ ३२ ॥ विनीयमानस्य सुहृद्वचोभिरपि तत
शोकानलधूमितस्य निबद्धवैरस्य विरोधिवर्गेण तस्यास्य
मासीत्पितुरस्य चित्ते ॥ ३३ ॥ अस्य देवान्तकस्य पितुः
रावणस्यार्जुनस्य वा चित्ते स्वास्थ्यं न सीत् चित्तेन स्वास्थ्य
तं बभूव किंभूतस्य सुहृदां वचोभिर्विनीयमानस्य शोका
न्वितमस्या नस्य पितृमाणस्य वा शोकेन शोकान
लेनाग्निना धूमितस्य समालीढस्य विरोधिवर्गैः शत्रुव
र्गैः रामादिभिर्दुर्योधनादिभिर्वा सह निबद्धवैरस्य निबद्ध
वैरं प्राप्तवैरस्य सः ॥ ३४ ॥ प्रधानहेतुभूतस्य निजा
त्मजनिपातने पराक्रमेण न सहे हेतु सुतात्मजस्य सः
३५ ॥ स रावणो दुर्योधनः [illegible] त्मजः पुत्रो
रामस्तस्य पराक्रमं पौरुषेण न सहे तेन मर्षति स्म न सोढ
मित्यर्थः निजात्मजस्य निजपुत्रस्य देवान्तकस्य निपा
तेन मारणे प्रधाने हेतुभूतस्य प्रधानस्य भूतस्य कारण
भूतस्येत्यर्थः पक्षे सोर्जुनः दुर्योधननामराजविशे
षो जयद्रथपिता तस्य जयद्रथ पवनस्य पराक्रमे
न सहे निजात्मजोभिमन्युस्तस्य प्रधानं कारणस्य
निहतवतो तेन भीमादयो निरुद्धास्तेनाभिमन्युर्विना
शोहतः तस्य [illegible] ॥ ३६ ॥ दोर्दण्डस्य पश्चात्कृतसिंध
राजोपमानः प्रतिहन्तुनिवैरिचक्रे रणांगने प्रापनरेन्द्र

सेनाप्रतिः दिव्यं भानुमतः प्रभेव ॥ ४४ ॥ नरेन्द्रसेनाता
मसेना रावणं गगने प्राप सेथामाजिरमाजगाम भानुमतः
आदित्यस्य प्रभा दीप्तिः भानुरदिवं आकाशमिव प्रामो
ति वैरिचक्रे राक्षससमूहे प्रेनाः प्रतिन्यन्दिनि प्रतिपक्षे
सतीति कीदृशी दोर्दण्डसेनपश्चात्कृतः सिंधराजस्तस्य
येन तस्मिन् पक्षे नरेन्द्रसेना कपिध्वजसेना वैरिचक्रे
दुर्योधनसैन्ये दोर्दण्डेनोत्कटेन पश्चात्कृतः सिंधराजो
जयद्रथो येन पश्चात्तस्मिन् [illegible] कृत्वा अस्य
[illegible] नि ॥ ४८ ॥ अथानिकायस्य जयद्र
थस्य वेधाय वेगेन कृतप्रतिज्ञः धन्वा विधन्वन्विजयस्याभी
यः परास्तराजा वरजोभ्युपेतः ॥ ४९ ॥ अथ ततोरसो राजो
रामस्तस्य भ्राता जोलक्ष्मणः परान् शत्रून् राक्षसान् अभ्य
येकु तेषामभियोगं चकार धन्वन् विधुन्वन् चालयन् की
दृशो विजये विचिन्ते जयेच्छावीर्यः स्थिरवन्तं कीदृशः अति
कायस्य रावणपुत्रस्य वधाय कृतप्रतिज्ञायेन जयन्त वे
गोयस्य सः वेगेन हरदान् पक्षे अर्थन्तरं विजयोर्जुनः स
जाव राजो कपिध्वजः अनिकायस्यानि देहस्य ज
यद्रथस्य वधाय कृतप्रतिज्ञा [illegible] स्थिरवन्तं धन्व
विधुन्वन् ॥ ४९ ॥ [illegible] कृतवर्मणा समरो [illegible]
हेतुः हृदत्तिणेन भूयः [illegible] मनस्वी प
रसेनां बुधिम भ्रमाजवाहे ॥ ४६ ॥ स लक्ष्मणः पर
स्य शत्रोः सेनां बुधिम भ्रमाजगाहे सैन्यसमुद्रमध्ये व्या
लोडयत् सेनिमारमारो योधीन्न कृतपङ्केन प्रतिप
क्षेण शत्रुणा सह महाहवे महासंग्रामे विधाय कृत्वात
कीदृशो नगर्त्तणा [illegible] वर्मणा कृतस्त्राहन
स्य दत्तिणेन दत्तिणावर्तिना मनस्वी मानवान् पक्षे
सोर्जुनः [illegible] येन कृतवर्मणा राजविशेषेणायो
धिना प्रतिपक्षेण सह महाहवे विधाय हृदत्तिणेनात्म

रा.च.
पा.
१४

यैंसरलेनगृह्णाति दक्षिणोदक्षिणे ... सरलश्छन्दवर्तिषु।
वामेत्रिषुयत्तादिवियिदानेदिषिास्त्रियामितिमेदिनीकरः ॥ ३६
अकलितलघुपातेसंप्रविष्टेनदूरादलघुविकरलोऽवेविसृतोवि
क्रमाग्निः रणभुविपरचक्रंव्याकुलंतेनतेनेविपुरमिवपुरस्तात्मा
यकेनस्मरारेः ॥ ३७ ॥ तेनलक्ष्मणेनपरचक्रंव्याकुलंतेनतेने
विस्तारितंहतमितियावत्‌ किंभूतेनअकलितमनाकलितं
लघुपातंयथास्यात्तथासंप्रविष्टेनसम्यक्प्रविष्टेनसंप्रवेशानंयस्य
तेनकुत्ररणभुविसंग्रामभूमौविसृतःसर्वतोदूरादस्मिंश्यै अलघु
यथास्यात्तथाविक्रमाग्निर्विक्रमएवाग्निःतमस्त्रैविकिरताविति
मानिपुरमिवयथापुरस्तात्पूर्वंस्मरारेःशिवस्यसायकेनत्रिपुरं
व्याकुलंतेनेचक्रे यद्वा तेनार्जुनेनपौषतल्पम् ॥ ३७ ॥ वि
न्दानुविन्दप्रतियोधिभेत्राप्राणीतसंसप्तकमेवमोहः स्वदर्पि
तोयोगहरःससपुत्रश्चकारदुर्योधनमानभंगम् ॥ ३८ ॥
सलक्ष्मणोदुर्योधनस्यरावणस्यमानभंगंचकारकृतवान्‌ दुः
खेनयोधनंयस्यसतथा योधबलाद्रावणइतिमानस्यविभ्रम
मुत्वतेः कीदृशः विन्दानुविन्दयोः प्रतियोधिनोर्विपक्षयो
र्भेत्राविदारकः विहलाभेरत्यतोनुयस ... लिंपिविदी
न्यांदीनां पापुत्रायेयोहचादीनामिति ... द्विनिद्दूपंप्र
णीतःकृतः संसप्तकानांसमरादनिवर्तिनांयोधानांजीवमो
हेतोयेनसः योभनंदर्पानंयस्य सदर्शनः सचासा
वयोगहरश्चेति सदर्शनोयोगहरः यद्वा सोर्जुनः
सयस्तात्पुत्राणांदुर्योधनस्यधृतराष्ट्रपुत्रस्यमानभंगं
चकार विन्दानुविन्दावर्वतीराजविशेषौ प्रतियोधि
नौ तयोर्भेत्राव्यापादकः संशमकः सशामीदिःस्व
दर्शनःश्रीकृष्णचक्रं तस्योद्योगहरः इत्यर्थः कोयोगनि
वेदइति ॥ ३९ ॥ निरोहिताकांशुचयैस्तदीयैर्निवार्य
माणोविशिखैर्विपक्षे अर्थविनीयोर्जितविक्रमश्चारये
नचक्राहयोश्हर्षिः ॥ ४० ॥ अथसाललक्ष्मणस्यहर

योवानराःहर्षचक्रुःकृतवंतः तदीयैर्लक्ष्मणसंबंधि
भिर्विशिखैर्बाणैर्विपक्षेनिवार्यमाणेनिवारितेसतिति
रोहिताःपिहिताःअर्कस्यादित्यस्यांशुचयाः तेजःसमू
हाःयैस्तेनतथा रथेनवेगेनअथविनीयापनीयाकुर्जितर
विक्रमस्याअतिपायितविक्रमास्याः यद्वा अर्जुनस्यहर
योश्वाःहर्षचक्रुःहृष्टाबभूवुः अर्थविनीयअर्थपरित्य
मंत्यक्त्वा रथेनकुर्जितविक्रमवर्तिनस्तदीयैरर्जुनस्य
संबंधिभिर्विशिखैविशेषैः विपक्षेविदार्यमाणेसतितिरोहि
ताकांशुचयैः संस्मृत्यादित्यकिरणैः ॥ ४० ॥ ययाज
घानदुर्योधनवीराणांशतमर्हम् तैमवाजत्रेगदयारणे
मत्तःश्रुतायुधः ॥ ४१ ॥ समस्तसोमत्रोयया गदयावान
राणांशतमंश्रेष्ठहरि सुग्रीवंजघानहतवान् तयैवगदया
रातसोरणेहतःसकीदृशःश्रुतायुधः प्रसिद्धास्त्रःतंकथंभू
तंदुर्योधनीयमहाबलं यद्वा श्रुतायुधोमत्तःभांतःयया
गदया वीराणांशतमर्हंदुर्योधनीयं कौरवाणांधनीयहरिश्री
कृष्णंजघान तयैवगदयाजघ्नेहतइति श्रुतायुधोनाम
कश्चिद्देवाद्दत्तगदः यतःअनेनसायहयायायुध्यमानेषु
द्धेहनिष्यसित्वनिश्चितंमरिष्यति अयुध्यमानायदेदिता
त्यजासिनदात्वामेवेयंगदयाहनिष्यतीति ततश्चासिनत्वा
हैकिलकृष्णमनयाद्दनिष्याम्यतः सर्वेमरिष्यंतीतिमनसि
कृत्वाश्रांतेनायुध्यमानायकृष्णायसापरावाहन्यनस्मिन्नेव
वर्तितासहननतइतिभारते ॥ ४१ ॥ अथसंगरवरंगमभ्युपेतो
तयामासवृकोदरोजमसाविपक्षम् पवमानमारीरजस्मभीमो
युयुधानस्चपतिर्वरूथिनीनाम् ॥ अनेनपवमानस्यवायोः
शरीरजःपुत्रोहनूमान् भीमस्तुवरूथिनीनांसेनानांपतिर्वा
नरेश्वरः युयुधानोयुध्यमानस्तावेवोजसाबलेनसंग्रामांग
नमभ्युपेतो तन्मध्येगोविपक्षंपाडंसमयामासतः हीनच
क्रुः यद्वा वायुपुत्रोभीमः युयुधानः सात्यकिः वरूथिनी
नांपतिःस्वामीसंगरंरंगमभ्युपेतो व्याहाभ्यंतरंप्रविष्टो अर

र्जुनस्य बाह्वाभ्यंतरं प्रविष्टस्य पत्त्रिणामयेव दृढं प्रविष्टो
२० ॥ एकेन भानांद्विपरं हतोऽच्छैरलं बलधं सत्कृता पत्रेण
ताभ्यां निरासे यत्र तैवै विहृन्दं यथांधकारं शशिभास्कराभ्यां श
ताभ्यां हन्त्र मङ्गीमाभ्यां वानराभ्यां एकेनायत तैवैरिवृन्दं निरासे
मयत संख्ये दशसहस्रसंख्यानि बलम् कीदृशेन भग्नः श्रेष्ठि
पो दृष्टो येन एवं भूतं वृक्षो वेगो यस्य तेन ताभ्यां मध्ये एकेनान्येन
भीमेन भीमनाम्ना वानरसेनाधिपतिना किं विशिष्टेनालम
त्यर्थं उच्चैर्बलस्य ध्वंसकृता विनाशकेन यथा चेन्द्राकीभ्यां
धकारं निरस्यते एते भीमकफधानाभ्यां अन्यत्समानं
२१ ॥ इधजिगीषाधृतिमांजेजनेयः कृतावसानोपि सह
लिवीरः त्वाष्ट्रस्य वज्रीव रणे निहत्य वृक्षि श्छेद भूरिश्रव
सःशिरोधिम् ॥ २२ ॥ आंजनेयः हनूमान् त्वाष्ट्रस्य त्वष्टुः
ब्रह्मा पुत्रस्य त्रिशिरसः भूरिश्रवसः बहुकर्मणः शिरोधिं
कृकाटिकां छिन्नवान् जेतुमिच्छा जिगीषा तया धैर्ये
इधत् कृतावसानो कृतापराधोपि हालिरेववीरः वज्रीव
इन्द्रइव एते सहालिवीरः फफधानः भूरिश्रवसः सोमक
स्य शिरो धीयते ते नेति शिरोधिः कृतावसानोपि भूरिश्रवसः
पादेन ताडितस्य विह्वलस्य शिरोधिमांजनेयइवइन्द्रेणत्वाष्ट्रे
हतः ॥ २३ ॥ प्राप्य भंगमिव नन्दनात्मजः सूदिनाविले
जगात्महोदयात् नीलपर्वपुनरङ्गभोमणिष्टशाणकृत्युष्य
इवभीमविक्रमः ॥ २४ ॥ पुनरपि वीलपर्व यथा धिपाः
उद्भवो प्रभुभेमहोदयात् इनन्दनात् इनस्य स्वामिनः
रावणस्य नन्दनः पुत्रस्तस्मादुद्भवो विपोघात् भंगं प्राप्य कीदृ
शः यशसा सूदितान्यखिलजगन्त्येन सः भीमभयानकः कि
मोयस्य सः शाणकृष्टो मणिरिव एते भीमस्य विक्रमः पुनेक
इधौ इनन्दनात् सूर्यपुत्रात् कर्णात् भंगं प्राप्य कीदृशात्
यशसा सूदितमखिलं जगत्तः महत्तउदारमत्स्यं तं येनतादृ
शात् शाणकृष्टो नीलमणिरिव ॥ २५ ॥ अथ विपक्षव
धप्रभृतिपार्थाः प्रसर्पन्मति बलत्रालरापो सायकैःसा

थिताध्वा त्वरितगतिसमित्रानन्दनः संप्रपेदे तपनत
वसमीपं सिंधुराजस्य पात्रोः ॥ २६ ॥ अथानन्तरं त्व
रितगतियथास्यात् समित्रानन्दनो लक्ष्मणः पार्थोः स
मीपं संप्रपेदे प्रपन्नः किंभूतः विपोर्वधेन प्रथयन् विस्तार
यन् भूमिपपूर्वभूमिपालस्य रामस्य आर्थी यस्मात्तत
थाप्रसर्पेति गच्छति प्रतिबले विपुसैन्ये जलराशौ इव
तस्मिन् दृष्टो सायकैः शरैः साधितोध्वावर्त्मायेन सतथा तप
नइव तत्स्तदृष्टौ सायकैः शरैः सिंधुराजस्य जयद्रथस्य
समीपं तपनः सूर्यः प्राप्नोति एते पार्थोऽर्जुनः पात्रोः
सिंधुराजस्य जयद्रथस्य समीपं प्रपेदे रिपुवधेन पृथ्वी
नीभूमिर्येषा सादेवं तपनः सूर्यइव शोभनानि यानि
मित्राणि तेषामानन्दः आनन्दजनकः ॥ २७ ॥ विघ्न
हेवाविलसितमिव व्योम्नि सन्दर्शयद्भिर्निर्विच्छेदप्र
सरफलमशेषि शोभावहद्भिः जेत्रे जन्य समयत
योरर्दमार्गे फलानां संछेहेद्युज्जुनवहाशिवाली
कपहैः इष्टवैः ॥ २८ ॥ अथानन्तरं लक्ष्मणानिकाः
ययोः समन्तस्य जन्य संग्रामो जातोस्तेजोयत स्तेरकैः इष्टवैः
बाणैः कीदृशैः विघ्न हेवायाः विलसितमिव व्योम्नि
सन्दर्शयद्भिः प्रकाशयद्भिः अतितेजस्वित्वादाश्चर्यत्वा
त्सामम् तत्रत्यं विच्छेदमूलोनिर्विच्छेद एवप्रसरोगम
नं यस्मेवं भूतस्य फलमस्यपतेगस्य श्रेणयः परस्परायाः शो
भावहद्भिस्ततस्य दृष्टो विस्मयः अर्धवर्त्मनि फलानां संछ
हात्स्थितस्य आग्रे शिखाभिवालीकः आकोणाः पत्तोवाजो
येषां ते तथा एते तयोरर्जुनजयद्रथयोः तत्समन्यत् जे
नकेजननीयेवाजन्मनिर्वाचयद्वयोरिति विस्मयः ॥ २९ ॥
गगनानि विलंघितानातिवेगात्रहितिचकोणानि बोहितेनपंगे
रजनी श्रावशाकयाजज्म्भे निजकालागमसत्त्ववोवि
पत्तः ॥ ३० ॥ विपक्षः अतिकायोजज्म्भे विकासि


रा॰
पा॰
१५३
106

नः सोत्साहोजातइत्यर्थः निजकालस्यात्मीयस्यसम
यस्यरात्रेरागमनेसत्वरः अर्थात्कद्धाय रात्रसाराणे
हिप्रबलाभवंतीति अतिवेगात् गगनानिविलेहिना
आकाशपालंघनशीलेनहरिचक्रेणवानरसमूहेन पतंगे
स्तस्यैनतर्हितेसति रजनीमुखवेणकयाइतिशेषंतत्त्वम् ।
३६ ॥ ततोमहत्स्वंत्रवदस्त्रमग्रेसंधायसंध्यावसी
न्निपात्रोः सूर्वानमहीपपसमीकमूर्ध्निप्रयोजिष्टघोस्त
रसोदरेण ॥ ३७ ॥ अनंतरंघटीस्थरस्य श्रीरामस्यसो
दरेणलक्ष्मणेनपात्रोवतिकायस्यपूर्वानमहीपपमह
दस्त्रंमहास्त्रंमंत्रवन्मंत्रयुक्तं दैवमित्यर्थः उग्रमचंडसं
धायअर्थान्धनषिप्रायोजिप्राक्ऊर्ध्विमित्यर्थः ऊ
त्रसमीकमूर्ध्नि संग्राममस्तिवसतिउपक्रांतइत्यर्थः संध्या
मुखवेलायामितिसमयकथनम् पक्षे घटीस्थरस्य
कापिध्वजस्यसोदरेणार्जुनेनपात्रोःजयद्रथस्योपरिस
स्मित्र ॥ ३७ ॥ अमुनास्यपुरद्विषेवराहोः स्तापितेमूर्ध्नि
विहायजीवलोकम् प्रचलन्नामितः कबंधभावेनर
णेकस्यभयंकरोतिकायः ॥ ३८ ॥ अमुनालक्ष्मणेन
अस्यातिकायस्य नामवतस्तोमूर्ध्निशिरसिच्छिन्नेसति
अतिकायोरात्तसः रणेकस्यनभयंकरोजातः अपितुस
र्वस्यैवेति किंभूतजीवलोकं विहायप्रचलन् कबंधभा
वेककबंधत्वंगमितः अरद्विषेव यथामुरद्विषाश्रीकृष्णे
नराहोःशिरसिच्छिन्नेसति अभयंकरोभूत् पक्षे अस्यजय
द्रथस्यकायःशरीरमतिभयंकरं कस्यनबभूव अपितुस
र्वस्यैव अमुजयद्रथस्यातिकायः अतिशायितशरीरंवा ।
अमुनार्जुनेनास्यमूर्ध्निच्छिन्नेसति ॥ ३८ ॥ तदाननेनो
त्पततातदानीमसत्कृत्ताविचित्रकिरीटभासा व्यरोचता
खाण्डलचापलेखासीमंतितप्रांतमिवांतरिक्षम् ॥ ३९
तदाननेति तदानीतस्मिन्कालेतदाननेनतयोतिकाय।

जयद्रथयोराननेनमुखेनउत्पततानाऊर्ध्वंगच्छता अंत
रिक्षमाकाशंव्यरोचतशोभतेस्मकथंभूतमिव आखण्ड
लस्यशक्रस्यचापरेखयाधनुर्लेखयासीमंतितः प्रांता
यस्यैतदेवंभूतमिवकीदृशेनअसकृत्तानाधिरोहितेनस्व
वक्तुर्भिलेणेत्यर्थः हतीयांतेपदंतथाविचित्रानानारूपकिरी
टस्यमुकुटस्यभाःदीप्तिर्यस्यतस्यभावेन ॥ ३९ ॥ छिन्ने
वलक्षणाउलेमुत्तमांगंशात्रोविवल्गात्कापिलस्यबाणैः
रणस्थितेःप्रापितमंतदेशोतेनेपितुःप्राणभयंनिजस्य
४० ॥ शत्रोरतिकायस्यकपिसहितस्यलक्ष्मणस्याबाणैः छिन्नं
छिन्नमुत्तमांगंशिरः कार्यनिजस्यपितुःरावणस्यप्राणभयं
वितेनेचकार तदृष्ट्वातस्यपितुःप्राणभयंजातं विशेषा
रणस्थितेः संग्रामभुवः अंतदेशोपनीतंलक्ष्मणाउलंयत्रे
ति पक्षे तस्यजयद्रथस्यनिजस्यपितुःवृद्धक्षत्रस्यप्राणभ
यंतेने उत्पतितंदृष्ट्वासोपिहतः कपिलक्ष्मणाकपिध्वजे
न अर्जुनेनअसेः हात्त्वमितिरणस्थितेःसंग्रामभूमितःपि
तुःवृद्धक्षत्रस्यांकेदेशाद्दसेःपतितं अन्यथा तस्यैवतत्कर्तु
तस्यवधःस्यात् ॥ ४० ॥ तदङ्गकादनभूमेः खेचरैः स्तूय
मानः प्रसभमवनिवेषैःसोदरोनिर्जगाम फाधिसमधिक
धौतांकीर्तिमस्त्रुत्यघ्रीप्रलयजलधिमध्याद्धीववराहः
परेव अवतिभर्तुः रामस्यकाधापिवस्यवासोदरोलक्ष्मणो
र्जुनोवाकदनभूमेः संग्रामभुवःनिर्जगाम वहिर्गतः खापि
विस्मागतः किंभूतः प्रसभमत्यर्थं खेचरैराकाशस्थैर्देवैः
स्तूयमानः तदनुतत्पश्चात् पाण्डवधादनंतरमित्यर्थः फाधि
समधिकमत्यर्थं धौतांनिर्मलांकीर्तिमुच्चैःश्रीवराहइवेति ।
प्रलयजलधिमध्यात्प्रलयकालेसमुद्रांमध्यतरोदाविवराहो।
वराहरूपीभगवान् श्रीकृष्णः पृथ्वीमुद्धृतवानिति ॥ ४१
तिशाकरेणेवनरेश्वरेणप्रणीतभास्वज्जयमंगलाश्रीः रा।
जराजावरजोजनानामदेवितत्वत्रिवकामदेवः ॥ ४२

राज्ञो रामस्य फाधिरस्य वा अवरजो लक्ष्मणो नुनो वा वराजस्य
अभे नरेश्वरेण श्रीरामेण फाधिष्ठिरेण वा प्रणीतराजयस्य मं
गलश्रीः मंगलसंपद्यस्य सोमेन वेति जनानां मदं वितन्व
न् कामदेवः कन्दर्प इव पतत्काव्यकर्ता कामदेवो राज
विशेषर इव वा सोपि निशाकरेण चंद्रमसा प्रणीतमास्य
ज्ञेयमंगलश्रीभवतीति ॥ ५२ ॥ इतिश्रीकविराजवि
रचिते राघवपांडवीये महाकाव्ये अतिकायजयद्र
थवधो नाम दशमः सर्गः ॥ १० ॥ अथ परिभवरोषा
त्ये विनासेन राज्ञा रजनिचरचमूभिः संगता सैन्यनाथाः ॥
अथ वितततरमरौत्सुर्धर्मराजस्य सैनं अथमिव निमिषाणां रा
घयोवासरांते ॥ १ ॥ अथानंतरं रजनिचराणां राक्षसा
नां चमूभिः संगता यक्ताः सैन्यनाथाः सैनिकाः पराभव
न रोषात् तेन रावणेन प्रेरिताः धर्मराजस्य धर्मप्रधानस्य
राज्ञः श्रीरामस्य सेनां तवितं श्रीघ्रमरौत्सुः रुन्धन्ति स्म
वासरांते संध्यायां तिमिरराशयः अंधकारसमूहाः पृथ्वी
मण्डलमिव पक्षे तेन राज्ञा दुर्योधनेन जयद्रथवधजनित
रोषात् सैन्यनाथाः द्रोणकर्णादयः धर्मराजस्य फाधिष्ठि
रस्य सेनां वासरांते अरौत्सुः राजनिचरचमूभिः संगताः
स्य फाधिष्ठिरपक्षपातिनः ॥ १ ॥ स्फुटाव्युभौ संप्रवृत्तावपे
तौ मिथो बलौ गानि विभंजतस्तौ सद्यो जगंतीव युगांतका
ले स्फुर्वापराव[illegible]म्बुनिधी प्रसक्तौ ॥ २ ॥ तावुभौ बलौ
श्रीरामरावणयोः कौरवपांडवयोर्वा सैन्यं समूहौ मिथो
न्योन्यं सैन्यांगानि हस्त्यश्वरथपदातिरूपाणि सद्यस्तत्क्षणं व
भंजतः विमर्दयतः संप्रवृत्तावुपागतौ युगांतकाले प्रल
ये संगतौ पूर्वपश्चिमावम्बुधी समुद्रौ जगंति लोकानिव ॥
२ ॥ अविरलरणधूलिध्वांतरुद्धे न दिशोज्वलितदृपाहिगंतानी
ब्रहेति प्रदीपैः द्रुतकवलितरोधः कन्दरो द्वारधीरध्वनिर्जनि
रजश्रीः सेनयोः संप्रवृत्ते ॥ ३ ॥ श्रीरामरावणसेनयोः पा

ण्डवकौरवसेनयोः रणश्रीः संग्रामसंपत् पौभाग्यजा
निजनिता कस्मिन्सति अंतरिक्षे पक्षे संप्रवृत्ते सति की
दृशे अविरला विस्तारा रणधूलिः सैव ध्वांतं तमस्तेन रुद्धे व्या
प्ते सा कीदृशी ज्वलिताः प्रदीप्ताः दृप्तादिगंता यया सा तथा
कैः तीव्रानि शिताया होतयो ह्याणिता एव प्रदीपास्तैः द्रु
तं शीघ्रं कवलितो रोधः कान्द रो येन पूर्व भूतउद्वार उद्भटो धी
रोध्वनिर्यत्र सा तथा द्यावापृथिव्योरंतराले रोधः ॥ ३
रणेरिपूणां बलभिद्विजेता गुरुप्रभावाद्युपा दुर्निरीक्ष्यः
महास्त्रधारानिकरैः प्रवीरान पेतसंग्रामततघश्चकार
४ ॥ बलभिद्विजेता बलभिदिन्द्रस्य विजेता मेघनादो
रणे संग्रामे शत्रूणां प्रवीरान्महायोधान् अपेत संग्रा
मतषः अपेता गता संग्रामतृष्णा येषां येभ्यो वा ताहृशान्
चकार कृतवान् महास्त्राणां धारानिकरैः धारासमूहैः
रणमुच्चनिवडून्योधान् जघ्नानेति गुरुणां अतिशायिने
न प्रभावेन दुर्निरीक्ष्यः पक्षे रिपूणां विजेता जयनशीलः
बलभित् बलभिन्नाम राजविशेषः गुरोर्द्रोणस्य प्रभा
वाद्युपामत्यर्थं दुर्निरीक्ष्यः परवीरान् पाण्डवपक्षपाति
नः शत्रुयोधान् बलं सैन्यं रिपूणां सामर्थ्यं वा भिनत्ति ब
लभित् ॥ ४ ॥ भिन्नांगदं त्रस्तबलाधिनाथं भ्राम्यत्क्षते
विक्लवदृश्यपुंवम् अभीमसंरम्भमनेन भग्नं वराजनाज्ञो
नरदेवसैन्यम् ॥ ५ ॥ नरदेवसैन्यं श्रीरामसैन्यमनेनेन्द्र
जिता मेघनादेन भग्नं भंगं प्रापितम् आसीत् संग्रामे नरराज
नस्यअभे किंभूतं भिन्नो विदारितोंगदो वालिपुत्रो यत्र त
स्तौ बलाधिनाथो सुग्रीवः यत्र भ्राम्यन् गजो
नामवानरविशेषो यत्र विक्लवो नाम वञ्चिपुंवो मैन्दद्वि
विदौ वानरविशेषौ यत्र न विद्यते भीमस्य वानरविशे
षो यत्र न विद्यते भीमस्य वानरविशेषस्य संरम्भो यत्र ।
पक्षे फाधिरसैन्यमनेन बलभिदा अंगदो भुजालंकार



विशेषः बलाधिनाथो धृष्टद्युम्नः गजाह्वनिनः श्रीयु
पुत्रौ नकुलसहदेवौ भीमो वृकोदरः ॥ ५ ॥ तयानदी-
येज्वलतिप्रतापेज्ञात्वामहोग्रमभेद्यमन्यैः विलोमे-
गत्वेमकरोवतारः स्वपक्षपीडांकथमप्यसोढ ॥ ६ ॥
विलोमवतारः श्रीरामः जगतां क्षेमं कल्याणं करोति ।
जगत्क्षेमकरः स्वसैन्यस्यपीडां विमर्दं कथमपि कष्टम-
सोढसहमानेऽस्मिन् नदीयरंघ्रजित्सम्बोधिनि प्रतापेज्वलतिस-
ति ब्राह्मं ब्रह्मावराल्लब्धं महत्तेजः अन्यैरभेद्यं ज्ञात्वा ॥ पक्षे
विलोमवतारः श्रीकृष्णः स्वपक्षस्य आत्मीयपक्षपाति-
नः पीडां कथमप्यसोढ नदीयेबलभित्सम्बोधनि प्र-
तापेज्वलतिसतीति ॥ ६ ॥ स्वशाक्तिजृम्भाभिरिवौ-
षधीभिर्निवारितारातिमहाहवपीडः उज्जीवयद्राजब-
लं त्रिलोकीं विस्मापयामासहरेः कुमारः ॥ ७ ॥ हरेः
कुमारो हनूमान् त्रिलोकीलोकत्रयं विस्मापयामास ।
विस्मितं चकार राजबलं रामसैन्यमुज्जीवयन् जीवितं कु-
र्वन् किंभूतानिवारितानिराकृता अरेर्महाहवस्यपीडा-
यायेनसतथा काभिरोषधीभिर्मृतसंजीवनीभिः स्व-
शाक्तिजृम्भाभिरीतिभिरिव पर्वतोषधीरानीय । पक्षे
राजबलं याधिष्ठिरसैन्यं जीवयन् काभिः स्वशाक्तिजृम्भा-
भिः निजप्रतापप्रपंचैः हरेरिंद्रस्य कुमारः अर्जुनः विकासे
जृंभनं जृम्भेति विश्वः औषधीभिरिवेति ॥ ७ ॥ वीरेषु
वैराम्यरचक्रमध्यं विशन्त्वनालोचितकालमेव ततःस्व-
पाणुद्रुमवर्तितोल्काकालदीपस्तमितांधकारं ॥ ८
ततस्तपायकंस्तपायां रात्रौ युद्धमवर्तत वृत्तम् किंभूतं
वैराम्यरचक्रमध्यं विशत्सु वीरेषु सत्सु कथं अनालो-
चितःकालेयत्रतत् युध्यं यथास्यादिति उल्काप्रवकरा-
लदीपास्तैः स्तमितंधकारंयत्र उभयत्रसमानम् ॥ ८
तत्रातिमात्रं रविनन्दनस्यतेजोदिदीपेपरवाहिनीषु निषि-

द्धनामन्यस्ततोघमस्यरक्षोवधायस्वयमुद्यतस्य ॥ ९ ॥
तत्ररात्रियुद्धे रवेरादित्यस्यनन्दनः पुत्रः सुग्रीवस्तस्यते-
जोदिदीपे दीप्तं बभूव तेजः पराक्रमः अतिमात्रमत्यर्थं
परवाहिनीषुरात्रसेनासु किंभूतस्यनिषिद्धोनामन्यस्तत
स्मद्युमेणस्योद्यमोयेन रक्षोवधाय स्वयमुद्यतस्य सुषेणं
नामवानरं निवार्ययुद्धायात्मानोद्यतस्येत्यर्थः पक्षे रवि-
नन्दस्यकर्णस्यपरवाहिनीषु पाण्डवसेनासु किंभूतस्य
निषिद्धोनामन्यस्तनतो नकुलसहदेवयोरुद्यमोयेनस-
तथा यद्वायेनिषोधः रक्षोवधाय घटोत्कचवधाय ॥
९ ॥ तमभ्यधावत्त्वलशत्रुर्दृप्तोघटोत्कचवसानीतविटंकमौ-
लिः चलाचलाकारकरींद्रपालीकुंभप्रभञ्जनासुदृढसंह-
तिश्रीः ॥ १० ॥ तं रविनन्दनं सुग्रीवमभिलक्षीकृत्यरात्त-
सःसघटोरात्रसःसुहृदाः अधावत् ततशत्रुर्यथास्यात्
उत्कचाऊर्ध्वकेशास्तैः स्फुरितोविटंकोयत्रताद्दृशोमौलिःय-
स्याः चलोगंतायत्रअचलः पर्वतास्तस्येवाकारोयेषामेवं
करीन्द्राहस्तिश्रेष्ठास्तेषांपालिः श्रेणीतस्याःकुंभभेनभग्नाअसु-
दृसंहतेः श्रीर्यस्या सापालिः कार्णितलाग्रेसावकोपंक्रोचमे-
षिति युक्तायामपिपालीस्याज्जातमश्रुश्रियामपीतिविश्वः
पक्षे तं रविनन्दनं कर्णमभिघटोत्कचोरक्षोवधात् कीदृ-
शोरक्षः हताःखणिकाः शत्रवोयेन तदेवंततशत्रुस्फीतःचि-
टंकःकिरीटोयत्रमौलिर्यस्य चलाचलाकारकरींद्रपाल्याः
कुंभप्रभञ्जनात्सुदृढसंहतिश्रीरहस्तीकोतिर्यस्मेतिवा ॥
१० ॥ भ्रान्तंतनगिरिनक्रचक्रमतिविराद्धृणितैर्वर्णैवराद्य
ताहितजीवितैः प्रहरणैरवाधांनवाधोनराम धृतेहास्य
विविदिविलोकसपुनर्यो वृहिन्निर्निपिष्टभटैः गीर्वाणादृहसुः
सविस्मयाधियोहूरण्नयोः संगरम् ॥ ११ ॥ तयोः सुग्रीवेन्द्र-
जितोः घटोत्कचकर्णयोर्वासमरे संग्रामे गीर्वाणादेवादृहसुः
प्रपंतिहरवात् सविस्मयाःसाश्चर्याधीः बुद्धिर्येषांते किंभूतमिव



रा०
पा०
१९


रात् शीघ्रमेव उद्घूर्णितैः कम्पितैः शरीरैः सन्देहैः क्रान्त्वा श्रोत-
मन्तर्वासिनां गिरीणां नक्राणां च वक्रं यत्र तथा स्रोतांसि
निलीयानि गृहीतानि रिपूणां जीवितानि यैस्ते एवं महदाणैर-
स्तैराक्रान्तौ रोधसौ द्यावापृथिव्यौ इतरं यथा तत्र धूलो
द्गमस्योत्थत्र एवं भूतो भिरिविलोको ग्रस्तलोको यत्र कौर-
वं क्रान्तं भटैर्योधैः कथंभूतैः पुनर्विशेषेणस्फूर्तिः परावर्तन
मावृत्तिः नपुनरागमनं तत्र निपुणायैस्तैस्तथा ॥ ९ ॥
ताभ्यामन्योन्यसैन्ये समरभावेकृतयोर्घमाने महाशस्त्रैः सयो
भारावतारात् क्षितिरपि स्वनत्वं भोगिभर्तुरेव वीर्यैर्वीरा
न्विमुक्तापूर्णमहामिकयागाहमानैः समन्तादाक्रान्तोद्यान
हर्म्यस्थलमाणिभवनाधौनैवासाभिभावात् ॥ १० ॥ ता
भ्यां सुग्रीवेन्द्रजिद्भ्यां घटोत्कचकर्णाभ्यां अन्योन्यपरस्प
रं रामरावणयोः कुरुपाण्डवयोः वा बले सध्यमाने सति
क्षितिरपि पृथ्वीरपि सद्यस्तत्काले भारावतारात् भार-
वैशेष्यात् स्वतन्त्रावभूव गर्वीबभूव कस्येत्याह भोगिभर्तुःशे
षस्य नागराजस्येत्यर्थः क्षितिभावात् शेषः स्वर्गोपि न नाम
त्समेनात् सर्वैः वीरैर्योधैराक्रान्तोद्यानहर्म्यस्थलमणि
भवनेति पृथ्वीविशेषणं वास्याक्रान्तानि उद्यानहर्म्याणि मणिम
यभवनानि च यस्याः सा किंभूतैः वीरान्विमुक्तायाश्रपि सहस-
हसिकाया अहंपूर्वमहंपूर्वमित्याकांक्षा गाहमानैः पृथि
वीदिवं वेत्यर्थात् स्वात्माभिभक्तावीरान्निवृत्यर्थः स्वात्माभिभ-
क्तावेति ॥ १० ॥ पावन्धरिस्याम नन्दनाम स्त्रीचतुरोपय-
स्याटथ्यमस्थयोर्द्वयोः बलानि भिन्नत्वमहेति संचयेर्नरा
नसेन्द्रोनिरचीयतावेः ॥ ११ ॥ समानसेन्द्रोमेघ-
नादो घटोत्कचो वा अपरैर्वानरभटैः योधैर्वा न निरची
यत नाज्ञायत किंकुर्वन् बहुभिर्दृष्टिसंचयैः अस्त्रसमू
हैर्बलानि उभयसैन्यानि भिन्दन् विदारयन् चरन्निति
धरित्र्यां पृथिव्यां चरन् गच्छन् तदनन्तरं पतांनरे ताणे

पीत्रंश्रुम्बेरेगाने चरन् उत्प्रेक्षते वितर्कें चेतिमेहि नीका
रः अग्रं तरंश्रुरोग्रे चरन् पश्चादपि चरन् ॥ १३ ॥ तद
नुरविस्तनेन प्रस्फुरच्छक्तिस्फुर्हद्रव्ययवभारैः त्वगादि
गदंतिकुम्भः रजनिचरनृपः लंकागांगेयकगांते गिरि
रिवपवनेन त्मानलेपातितोभूत् ॥ १४ ॥ तस्य पश्चात्
रविस्तनेन सुग्रीवेन कर्णेन रजनिचरनृपः रावणसेना-
पतिः कुम्भनामा घटोत्कचो वा रावणसः त्मानलेपातितो-
भूत् पृथिव्यां पातितोभूत् द्वन्द्वः संयोगेसंग्रामेरजनिच
रस्यासौ नृपश्चेति कुम्भघटोत्कचयोरुभयोः पक्षे
समासः किंभूतः प्रस्फुरन्ती शक्तिर्विशेषो यस्य घटोत्क
चपक्षे देहलेगनेव शक्तिः पलाघ्राणा कर्णेन दत्तेन
उद्यन्त्यर्थं हृहतो वप्रवस्य हलपादैः भारेण त्वगादि
गदंति नोपयास्मादेवं कुम्भापक्षे घटोत्कचपक्षे हृहद्द्र
व्यवभारेण त्वगादि गदंतिनो कुम्भाः कुम्भस्थलं येन कुम्भो
राष्ट्रपं तदेहमिति पूर्वार्थे रावणसांगते इतिमेदिनीकरः पक्ष-
गांते मलयपातितो गिरिरिवेति ॥ १५ ॥ तस्मिंस्तदा
पेक्ष भिरीदीर्घ निद्रां बभूव प्लोकाकुलितः स्वपक्षः विरोधि
वर्गः सतता जहर्ष न कोपि सर्वः भियतामपैति ॥ १५ ॥
तस्मिन् कुम्भे घटोत्कचे वा तदा तस्मिन्काले दीर्घनिद्रा
मरणं उपेक्षापि उपगतेसति स्वपक्षः उभयो रात्मीयव
र्गः शोकाकुलितो बभूव विरोधिवर्गयोरित्यर्थात्
वानरसमूहः कौरवसमूहो वा स्ततगमति शायेन जहर्ष न न
तेकोपिन सर्वः भियत्वमपैति निश्चक्रतीतियावत् ॥ १६ ॥
तदनु किलानि कुम्भः कोपस्फूलंयघोग्रे निधिमिव सलि
लानामद्भुतेक्रुम्भजन्मा रणभुवि परसैन्यं सूत्यतामाप्नु-
नित्ये भुवनदहनदाहास्ताम्भसीनास्तुतेजाः ॥ १७ ॥
तस्माद्वानिकुम्भः कुम्भकर्णपुत्रः भार्गेणिनिकुम्भः
राजविशेषो वा रणभुवि समरेरिपुसैन्यं उभयत्र सून्य

रा॰व॰
पा॰
११०

तां योधादिशून्यत्वेमाश्मशीवंनिन्ये अनयत् किंभूतः
भुवदहनस्यदाहारंभेदाहोपक्रमे तीव्रमत्युग्रंतेजोयस्य
सतथा उग्रंभयंकरंकोपस्थलमुदरस्थलंनिकुम्भउरोध॰
धिर्विघ्नोघोयथानिराकरोत्इति यथाकुम्भजन्माअ
गस्त्यः सलिलानांनिधिंसमुद्रं शून्यतांजलशून्यत्वं
नीतवानि निकुम्भः कुम्भकर्णस्यतनयइतिकोषयेद्
तिमेदिनीकरः ॥ ९९ ॥ बाणार्णवोद्वेगमितेषुभूयो
नेकेषुनाकंबलनायकेषु यथाःपलायंतकथपिष्टि
रस्यसैन्यानिकुम्भोद्भवभीतियोगात् ॥ ९ ॥ कथसं॰
ग्रामेस्थिरस्यरामभद्रस्यसैन्याः सैनिकाःकथः संग्रामात् ॥
पलायंतपलायिताः निकुम्भादुद्भवोयस्यास्ताहृष्याःभी
तेःयोगात् संबंधात् सेनायांसमवेतायेसैन्यास्तेसैनिका
स्ततेदृत्यमरः अनेकेषुबलनायकेषुयूथाधिपेषुबाणा
र्णवोद्वेःबाणसमुद्रसमूहैः नाकंस्वर्गंगमितेषुसत्सुविनाशि
तेषुदृत्यर्थः नैकेषुइतिकविन्यादः नपकारःशिरस्वालनेत्र॰
यित्वनेकेषुइत्यर्थः यद्वे यपिष्टिरस्यधर्मनन्दनस्यनिकु॰
म्भोराजविशेषोबाणएव अर्णवोद्धाः समुद्रप्रवाहाः
भूयःपुनरपीति ॥ ९ ॥ ततःकुमारव्यसनोग्रवार्तांगरो
विदित्वास्वकरंनिपातनम् हरिर्मरुन्नन्दनउद्यतात्मासम
दृधेतन्निधनाययत्नम् ॥ ९ ॥ मरुन्नन्दनोवायुपुत्रो
हरिर्वानरःहनूमान् तन्निधनायनिकुम्भवधाय यत्नं॰
समादधे अकरोत् किंकृत्वाकुमारस्यरावणपुत्रस्य
यद्व्यसनंवधः तेनोग्रावार्ताम्प्रवृत्तिः तांविदित्वा ततोग्र
रोरावणस्यनिपातंवधंस्वकरंविदित्वाज्ञात्वा उद्यतआ
त्मायस्यसतथा कुमारव्यसनश्रवानन्तरोविदित्वेति॰
ह्यापिपादः तत्रकुमारस्यरावणपुत्रस्यव्यसनंतस्य॰
श्रवात् श्रवणात् तन्निहितस्यपितुःरावणस्येत्यर्थो
त पक्षे हरिश्रीकृष्णःतन्निधनायनिकुम्भनामकभार

तयोद्धराजविपोषनिधनायकुमारोघटोत्कचः त
द्व्यसनोग्रवार्तांविदित्वा गुरोर्द्रोणस्यनिपातंस्वकरं॰
विदित्वामरुन्नन्दनोभीमः उद्यतात्माप्रकाशितात्मा
यद्यनयोरेकव्यापाज्ञयानकर्णोघटोत्कचंनिहन्यात्त
दानयाद्भेनंनिहन्यादितिहृष्टयेत्प्रकाशितवानितिभावः
व्यसनश्रवादितिपाठे कुमारस्यास्वत्थाम्नोव्यसनश्रवा
तन्निहितस्यपितुः द्रोणस्यनिपातंस्वकरंविदित्वा यदायं
द्रोणोश्वत्थाम्नोविनाशंश्रोष्यतितदाशस्त्रत्यागंकरिष्यति
तदास्यनिपातनं स्वकरमितिभीमप्रकाशितम् ॥
९ ॥ हतास्त्रसंतानविघातवार्तामनीश्वराःसोढुं॰
मसौसमन्युः प्राणच्छिदःशत्रुबलस्यमध्येनेताबला
नंविससर्जहेतिम् ॥ ९९ ॥ असौनिकुम्भोबलानांनेता
सैन्याधिपः प्राणच्छिदःप्राणापहारकस्यशत्रुबलस्यरा॰
मसैन्यस्यमध्येहेतिमस्त्रंविससर्ज तत्याजकीदृक्कृतस्य
त्रिमस्यअस्त्रसंतानस्य अस्त्रसमूहस्यविघातवार्तांसोढुं॰
निघाहित्वमनीश्वरोऽप्रभुः अतएवसमन्युःसक्रोधः इति
पक्षे असौबलानांनेताद्रोणःप्राणापहारकस्यशत्रुबल
स्यमध्येसमरांगनेहेतिंविससर्जअस्त्रत्यागंकृतवानिति कृत
मस्त्रंयेनएवंभूतस्यसंतानस्यपुत्रस्य अश्वत्थाम्नोविघातवा॰
र्तांमारणप्रवृत्तिंश्रोतुमनीश्वरःसमन्युःसशोकः अश्वत्था
माहतइतियुधिष्ठिरवाक्यानंतरमनेनास्त्रत्यागःकृतइति
भारते बलानांनेता धृष्टद्युम्नः संतानंघटोत्कचइत्य
पियोजना ॥ ९ ॥ धृष्टद्युम्नःसंपदिपवमानोद्भव॰
स्तीव्रकर्मानिकृत्तास्त्रप्रकरमभितस्तंसवेरोभिपद्य कु॰
र्वन्कायात्पृथगरिशिरःकोरवान्क्षोभयित्वासंग्रामाग्रे
त्रिदिवपदवीपार्थमेनंव्यधत्त ॥ २० ॥ संपदितत्काले
पवमानोद्भवोवायुपुत्रोहनूमान् एवंनिकुम्भंत्रिदि
वस्यस्वर्गस्यपदव्याःपद्धतेर्वर्त्मनःपान्थंपथिकंव्यधत्तव



रा.च.
पा.
१२

गेवर्म्मचारिणंचकारेत्यर्थः विनाशितवानितियावत्
कीदृशः धृष्टद्युम्नःतेजोयस्यसधृष्टद्युम्नः द्रौ
णस्यदुर्गेनेभीतेयस्मिन्विन्नेवलेपिचेतिमेदिनीकरः तौ
व्रकमेघस्यसतीव्रकर्माकिंकृत्वानिःशेषेणकृत्स्नस्यपर्णैः
अस्त्रप्रकाशेयेननतम् अभितःसर्व्वतेभिपत्यनिपत्यसहवै
रेणवर्त्ततेइतितस्यनिर्ब्भयस्यशिरःकायात् पृथक्कृत्वेन
छिन्दन् संग्रामाग्रेकोपृथिव्यांप्रवान् रथकल्पान् क्रू
ननादान् क्षोभयित्वा पक्षे धृष्टद्युम्नोद्रुपदनन्दनः द्रो
णेणपवनमानोद्भवः वक्षेकलत्नःकौरवान् दुर्योध
नादीन् पोषंतलाम् २॰ साधुइधीरपिनिरस्तधैर्या
विभ्रष्टनानायुधयोधवाहा दृष्टेवपश्चात्प्रतिकूलदैवा
त्सेनापरेषांभवत्पराङ्मुखी ॥ २१ ॥ परेषांशत्रूनांराक्ष
सानां कौरवाणांवासेनापराचीपराङ्मुखीबभूव किंभू
ता यद्वे धीरपिधैर्यवत्यपिनिरस्तंधैर्यंयथासाविशेषेणभ्र
ष्टाः नानायुधानिवयोधाश्चाश्वाश्वयत्रयद्वाविभ्रष्टाःप
लायिताः नानायुधानानाहस्तकायोधानांवाहाः अश्वा
दयोयत्रयद्वाविभ्रष्टानिनायुधानियेषांयोधावाहाश्च
ति प्रतिकूलदैवाद्यथाप्रतिकूलावस्था पुंसांपरावर्त्ततइति
२१ ॥ पितुर्न्निपातादृढवद्धवैरः पाञ्चालानांतनयःद्रो
णस्य रोषेणमूर्च्छन्दरातत्रैफणात्ययेवार्द्धिविलोलवेला
ला ॥ २२ ॥ द्रोणस्यरोषेणविशेषस्यतनयःपुरोवातसः
मकारालोनामवलानांपत्युःपितुःद्रोणस्यनिपातादृढा
दृढवद्धवैरंयेनसामेरामहतिशेषः तथारोषेणमूर्च्छन्
कारवमगात्ययेकल्पान्तेवार्द्धिः समुद्रइव उच्चचाल
पक्षे द्रोणस्यतीव्रस्यपितुःद्रोणस्यनिपातादृढवद्धवै
रलानांपत्युः सेनापतेःद्रोणस्यतनयः अश्वत्थामारो
षेणमूर्च्छन्ति मकरस्येवासिणीयस्यसमूर्च्छंमकराज्ञः
पोषंतलम् ॥ २२ ॥ अभीतिभाजाविहिताभियोग

स्तेनक्षणात्क्षोणिपतेर्ब्बलौघः नारायणास्त्राभिहतो
बभूवराहोरधःकायइवापचेष्टः ॥ २३ ॥ तेनेकवा
क्षेणक्षणोविशेषेणक्षोणीपतेः रामस्यबलौघः सैन्य
समवायः अभिहतः अपचेष्टो बभूव चेष्टारहितोजा
तइत्यर्थः कीदृशेनअभीतिभाजा निर्भयेनकिंभूतः
विहिते अभियोगआस्कन्दोयस्यसनारायणास्त्रेणाभि
हतो राहोःकबन्धोपचेष्टोयथाबभूवेति पक्षे तेनाश्व
त्थाम्ना नारायणोदेवतायस्येति एवंभूतेनास्त्रेणक्षोणी
पतेः युधिष्ठिरस्यबलौघः क्षणादपचेष्टोबभूवेति
द्रोणेहते अश्वत्थाम्ना समागत्यनारायणास्त्रंक्षिप्तम
स्त् ॥ तदुत्क्रान्तिनिराबाधबाणवाडववह्निभिः क्षोणी
पालबलाम्भोधिः क्षणात्क्षयमनीयत ॥ २४ ॥
क्षोणीपालोरामोयुधिष्ठिरोवा तस्यबलाम्भोधिःसै
न्यसमोहः क्षणात्क्षयंविनाशमनीयतनीतः तेनमका
राक्षेण अश्वत्थाम्नावा उत्क्रान्तानिराबाधाबाधशून्या
बाणास्तएववाडववह्नयोवाडवानलास्तैः अन्यैरपि
समुद्रोयुगान्तेवाडवानलैःक्षयंनीयते बाणवाडवव
ह्निभिरितिपाठेबाणवाणांवह्निभिःदाहकैरित्यर्थःप
क्षे नरस्यपुरुषस्यदारुणैःक्रव्यादैः तेनमकराक्षे
णउत्क्रान्तयेनिराबाधाबाणास्तान् वातिगच्छतीति
तदुत्क्रान्तानिराबाधबाणावाः इतिक्षोणीपालबलाम्भो
धिविशेषणम् ॥ २५ ॥ मुक्तायुधमहायोधासम्भ्रान्त
पवनात्मजारामावरजवाचासापदृष्टस्यापिताचभूः साच
भूः श्रीरामसेनायुधिष्ठिरसेनावा रामस्यावरजः लक्ष्मणस्त
स्यवाचा रामस्यबलभद्रस्य अवरजः श्रीकृष्णस्तस्यवा
चा एवंभूतस्यापिताच संग्रामांगनावस्थितक्षेत्रेत्यर्थः मुक्ता
न्यायुधानियैरेवंभूतामहायोधायत्रसाभयाद्वासंग्रामार्थं
वा मुक्तानीतिशेषः महाश्चयोधाइत्यकारप्रश्लेषेकृतेभ

त्यक्तं॰

भयात्त्वं त्यक्तं मां न जहि मया त्वं त्यक्तमिति तद्धानिवे॰
केणायोधनेन संग्रामार्थमिति भावः संभ्रांतः पवनात्म॰
जो हनूमान् भीमसेनो वायत्र ॥ २५ ॥ श्रीकण्ठकण्ठ
मषिदादिव कालकूटः पूर्वमयोनिधिमिवोर्वमनः॰
प्रकोपः आसाद्यमानवत्तं तु कबंधरणं तस्य प्रताप
महिमा प्रणामामतीव्रः ॥ २६ ॥ तस्य मकरध्वजस्या
त्यास्तो वातीव्रः प्रतापस्य महिमा प्रणाम प्रणीतो
बभूव किं कृत्वा मानवत्तं तु मनुष्यपार्श्वे रामहृषिणा॰
कृसेवा समासाद्य प्राप्य कालकूट इव यथा श्रीक
ण्ठकण्ठशिवस्य कण्ठं प्राप्य प्रणाम ॥ २७ ॥ प्रता
पमाग्नेयमिवाह्वमस्य रुद्राजितारिं नरदेवसूनुम् तं
वीरलक्ष्मीर्जुघेनस्मनक्ष्मगा वललक्ष्मीरिवकामदेवं
२८ ॥ तं नरदेवपुत्रं रामं कथाधिरिवा वीरलक्ष्मीः
जयलक्ष्मीर्जुघेतेस्म असेवत कीदृशं अस्य मकार
तस्य असत्याधोवा प्रतापमाग्नेयमस्त्रं तत्सन्नि
भं तदस्त्रं वा रुद्राजितोरिः पात्रयेनेत्म यथानङ्ग॰
गा बललक्ष्मीः कामदेवं कन्दर्पमिव यतान्ता व्यकर्ता
रंराजानं कामदेवनामानं वा जुघत ॥ २९ ॥ ॥
इति श्री कविराजपण्डितविरचिते राघवपाण्डवीये महा
काव्ये कामदेवांके एकादशः सर्गः ॥ ११ ॥ श्रीः ॥
अथ गोमारमगानां जिष्णो जेता हवे संग्रामे व्ययोजया
मास सदृशा स्योजने श्वरः ॥ १ ॥ अथानंतरं सदृशा॰
स्तो रावणः जिष्णो विन्द्रस्य जेतारं इंद्रजितं मेघनादनामा
नं पुत्रं आहवे समरे योजयामास नियुक्तवान् किंकृ॰
त्वा अंगानां सेनांगानां हस्त्यश्वरथपादातीनां गोमारं॰
संभाव्य जनानामीश्वरः पक्षे जनेश्वरो दुर्योधनः स
दृशास्यः सत्ताकृतनेन अदृशास्यः अदृशासनीयः अजय
देयपदस्पर्धः अंगानां देशविशेषाणां गोमारमंगराजं क॰


र्णं योजयामास वैरर्जुने इति विरोधः ॥ १ ॥ सपाकशासना॰
पच्छि विमेघनादो धन्वन्धनुर्ज्याप्रावतेगि कर्णः रणा॰
य भर्तुर्जयकारणाय जवेन जैत्रं रथमारुरोह ॥ २ ॥
सद्वृत्ति मेघनादः इंद्रजित् वेगेन जैत्रं जयनशीलं रथमा
रुरोह धन्वधुन्वन् चालयन् पाकशासनस्य वज्रावि॰
पक्षतत्त सकिभूतः ज्याप्रावयोः धनुर्गुणबाणयोः संगीक
र्णौ यस्य आकर्णाकृष्टज्याकार्मुकः रणाय संग्रामाय भ॰
र्तुः रावणस्य जयार्थमिति पक्षे सकर्णो राधेयः मेघस्य॰
वन्न सदृशस्य मतयोज्याप्रावतेगि धनुर्विधुन्वन् भर्तुः दुर्योध
नस्य जयार्थम् ॥ २ ॥ उत्सर्पत्कालकालचोच भीषणा
भिर्वालोलधृज पटलीछदिकूटीभिः संग्राम प्रमदतरा
दृसंभ्रमाभिर्वीरा[illegible]वाहिनीभिः ॥ ३ ॥
अथानंतरं उभयवाहिनीभिरुभयवीराणां योधानां वाहि
नीभिः सेनाभिस्तदृशम् संप्रवीतं हृद्यं धर्म्यस्तोधातो
भावे लट् तत्सर्पता उत्क्षिपता कालकालचोचभीषणावी
रध्वनिना भीषणाभिरिति वाहिनीभिर्विशेषणम् वि
शेषणालोलैश्चचलैर्ध्वजपटैलीच्छसमादिकूटीया
भिस्ताः संग्रामे प्रमदस्य हर्षस्य भरादतिशयात् संभ्रमा॰
भिर्भयशून्याभिः ॥ ३ ॥ समिद्धराधेयभुजप्रतापे द्विष
द्वलेहरिविषयं प्रपन्ने चमूभृता वज्रिभवेन गर्जमाने रेन्द्र॰
सेनात्वरतेस्म योद्धुम् ॥ ४ ॥ नरेंद्रस्य श्रीरामस्य सेनाया
द्रुंत्वरते स्मत्वरां पाकार द्विषतां शत्रूणां बले हरिवि
षयं प्रपन्ने सति हृष्टे सतीति कीदृशे समिद्ध रायां संग्रा॰
ग भूमावाधेय आरोपणीयो भुजप्रतापो यस्य सा किं भूता
वज्रिभवेन नीलेन चमूभृता सेनापतिना गर्जमाने दृक्षिता
पक्षे नरेंद्रसेनाधिपति सेना समिद्धउपचितोराधेय
स्य कर्णस्य भुजप्रतापो यस्य तादृशे द्विषद्वले वज्रिभ
वेन पृथ्वीधनेन पाण्डवं तल्पम् ॥ ४ ॥ रणस्य वलिततना

नाहेति बालप्रवाले प्रतिबिम्बमुपनीते स्फटिकनाम्ना
च द्रुतमिव वनराजीनिर्गतेनिम्नगाभ्यां गगभविजयवदा
ते तेऽभेराजसेने ॥ ५ ॥ ते उभे राजसेने रामरावणसैन्ये कु
रुपांडवसैन्ये वा संग्रामभूमौ जयवदाते संसक्ते र्बभूवतुः ।
द्रुतं पीछं निर्गते निर्गते निस्तते निम्नगाभ्यां नदीभ्यां लदते
वनराजी इव परस्परं जयवदाते रभसेन वलितानानाहेतयो
नानास्त्राणि तपव बालवालान वकिसल्यायैस्ते तथा
स्फटिकनायमेन मन्त्रनारोहेण प्रतिमाबिंबं संक्रांतं बिंबमुपनी-
ते ॥ ५ ॥ आहूतामरलोकवरवनितैर्दिग्व्यापिभेरी
रवैर्हराहृतकबंधवृन्दमाविद्धलान्दैरस्त्राक्तधूलिभिः
समाधीकृतनाकनायकपुरं संप्राप्तकश्रेणिभिर्दन्ता
दंतिकचाकचिद्रुतमभूद्यद्धं तलातल्यपि ॥ ६ ॥ त
योरुभयोः सेनयोर्युद्धमभूत् आहूता आज्ञायिता अ
मरलोकस्य वरवनिता उर्वशी प्रभृतयो यत्र कैः दिग्व्या
विचरणशीलैः भेरीरवैः पटहैः तथा अस्त्राक्तधूलिभिः रु
धिरनदीभिरचिरात्कृष्टोहृतादेव आकार्षितं कबंधानां वृ
न्दं यत्र दंतैः दंतैः प्रहृत्य यद्रुवति तन्हंतादंति यद्धं हृत्वा
तेनेदं वमिति समासद्वयं तिष्ठाद्विइतिच समासांतः अ-
न्येषामपि दृश्यत इति दीर्घः यस्येति चेतीकारलोपः ति
ष्ठद्गुप्रभृतीनि चेत्यव्ययीभावसंज्ञया मव्ययीभावश्चे
त्यव्ययत्वम् अव्ययादाप्सुप इति सुलुक् एवं कचैः
कचैः प्रहृत्य प्रहृत्ये कचाकचि तलैः तलैः प्रहृत्य
यद्धं तलातलि तलस्वपेटः संप्राप्तकानां यस्त्रादनिव-
र्तिनां श्रेणिभिः समाधीकृतं संकीर्णीकृतं नाकनाय
कपुरमिन्द्रपुरं यत्र तेषां स्वर्गातिथीभूतत्वात् ॥ ६ ॥
विधायिनिः सत्त्वमिवारिवृन्दं स्वतीव्रधामप्रभवैः प्र
तापैः विवेशवीरः स विवेशभूमिं द्वीपांतरं सूर्यमिवो
पसंध्यम् ॥ ७ ॥ सवीरो मेघनादः निवेशभूमिं शि

बिरं विविश उपसंध्यं संध्यासमीपे द्वीपांतरं सूर्यमि-
व किंकृत्वा अरिवृन्दं निस्पन्दं निश्चलं विधाय कैः प्रता
पैः कथंभूतैः स्वयत् तीव्रं धाम ततः प्रभवो येषां ताहृ
शैः एते सकर्णो वीरः निवेशभूमिं शिबिरं विवेश ।
शेषं तल्पम् निवेशः शिबिरं स्यात् शिबिरोद्वाहयोरु
पीतिविश्वः ॥ ७ ॥ प्रगे समहत्तांशुरिवोज्ज्वलप्रभः
सवेगसज्जीकृतभीमकार्मुकः रथेन भूयः समराय
निर्ययौ विपक्षवक्त्राजुगपाल्यसारथिः ॥ ८ ॥
प्रगे प्रातः सद्यःदिनित् समराय निर्जगाम सूर्य इव
उज्ज्वला प्रभा तेजो यस्य स तथा समानमेवो भयत्र स
किंभूतः वेगेन त्वरया सज्जीसगुणं कृतं भीमं भयान
कं कार्मुकं धनुर्येन स वेगेन रथेन भूयः पुनरपि विपक्षेवा
न्मुखयानुगामी पाल्या स्वविशेषो यस्य एवंभूतः सारथि
र्यस्य स तथा एते सकर्णः निर्ययौ विपक्षवागाच्छान्त
गतः ॥ ८ ॥ निर्यंतीमुपरितो वरूथिनीमाहवाय
परिपाकदारुणाः सूचयन्समचकिते सूचवैः कर्ण
पाल्यपक्षपातिविस्तरः ॥ ९ ॥ चकितैः सभयैः स
सूचवैः सैनिकैः कर्णपाल्यपक्षपातिविस्तरः कर्णयोः
पाल्या स्वविशेषो यद्वपक्षपातो विस्तरः प्रपंचः सू-
यते स्म किंभूतः परिपाके परिणामे दारुणः परितः
सर्वतः एव वरूथिनी सेनां आहवाय निर्गच्छ
न्तीम् एते कर्णपाल्ययोः राधेयमद्राधिपयोः पक्ष
वचन विस्तरः परिपाकदारुणा इति कर्ण विना
पाहेतः पौषं तल्पम् ॥ ९ ॥ अत्रकालज्ञधास्तो-
यवीरः सारथिनायतः श्रेष्ठमानसेन वनीयमा
नरथो बभौ ॥ १० ॥ सवीरः रक्षजित् बभौ अस्त्र-
भे अत्र कालकारिणा सारथिना नीयमानरथः समर-
भूमाविति शेषः अथ प्रातःकालानंतरं कौलीलेख

मानिवस्तूर्यइव अरुणेनेवेति अरुणेवेत्यर्थः ॥
पत्ते अनंतरं कालानंतरं अत्रकालतृषासार्थिना
शाल्येन नीयमानरथ्यः सवीरः कर्णाः पोषंतल्पम्
१० ॥ द्विषिभिन्निप्रतिघट्टनोद्भवमहाघोषैर्जगद्भीषय
न्वाणानसावसृजाधनुर्जलमुचानेन्द्रजित्स्वर्गाः
नानावीरविमर्दवर्तिनभुजाकाण्डविनोदस्तृणा द्र
भर्णप्रलयार्णवप्रतिनिधिः पृथ्वीपतेः प्रापसः ॥
११ ॥ सइन्द्रजित् पृथ्वीपतेः श्रीरामस्यार्णसमी
पंसमापकिंभूतः प्रलयार्णवप्रतिनिधिः प्रलयकाली
नसमुद्रसदृशः सोपिकथंतेपृथ्वीधरस्यसमीपंप्रामो
ति नानावीराणां विमर्दवर्तिनो भुजयोः काण्डः वि
नोदं अप्पयनेयेनसतथा द्विषीभिन्नयपवर्तिभिः
न्नयः तासांप्रतिघट्टनेन संघट्टनेन संघट्टनेनोद्भ
वोयेषामेवोद्भूतैः महाघोषैः महारवैः जगत्संवे
संसारंभीषयन् बाणान्नामावार्णवाणापवासारा
निवातान् सृजनीतिबाणासारस्तत्र नादृशेनध
नुर्जलस्वामेघसदृशेनधनुषा अरुसृजितनवगाःस्व
र्गविनदीतन्वन् विलासयन् पत्ते सकोपिः पृथ्वी
पतेर्यथापिश्रस्यतृणाहदविमात पोवसमानम् ॥
११ ॥ कुर्वाणोबाणावेषैर्यतिदिविषदांस्वैरयात्रां
नवोचं भंकारैः कर्षयंतोवकलमदनदीनिर्गमं
दिग्गजानां सद्यः प्रत्यर्थवीरोपिगुणविवशः स्तू
यमानप्रकर्षोप्राप्यार्थेनामवीरोसभटजनदृशा
लक्ष्यभूतौबभूवाते ॥ १२ ॥ ताबुभोप्रवीरो ल
क्ष्मणेन्द्रजितौ कर्णार्जुनोवा प्राधुधेन प्रकर्षेणा
पोडसकुर्वताम् कीदृशौ सुभजनदृशांवीरवत्त
योलक्ष्यभूतौ दृष्टौ कदाचित् शिलावपातं कदा
चित् अरुदृष्टौ कथंभूतौ दिविषदो देवास्तेषाविय

ति गगने स्वैरयात्रायाः स्वेच्छागमनस्यांतरायंवि
घ्नं कुर्वाणौ सायकवृष्टिभिर्बाणवर्षैरित्यर्थः द्विप
जानां झंकारैर्वकलामदनदीनिर्गमंबहिर्गमनंकर्ष
यंतौ मध्यस्तत्काले प्रत्यर्थीवर्गोविपक्षोपि पात्रसमूहोपि
गुणविवशः गुणपराधीनः स्तूयमानः प्रकर्षः योत्
द्धेकोययोस्तौ ॥ १२ ॥ सकोलक्ष्मीवाहितमर्मवाणे
श्वकारपीडांमहतींमहीपतेः तृणेनसीतारूपणा
व्यलीकाच्छवीवलसेवमहानवग्रहः ॥ १३ ॥
सइन्द्रजित् महीपतेः श्रीरामस्यमहतींपीडांचकार
कृतवान् कीदृशः वाचः शाठ्वाच्छरामेनाहितम
र्मघट्टनेयत्रकृतइत्याहतृणेनेति सीतायामेथिल्याः
तृणेनयत्तृपर्णातद्देवव्यलीकमप्रियं तस्मादिति स
किलसमितोमयामंथीसीतानिर्मायकेणछिन्नो
आकाशेरामसमक्षं हतवानितितृणेन महानवग्रह
इव यथामहानवग्रहोवृष्टिप्रतिबंधः कृषीवलस्यक
र्षिकस्यपीडांकरोति अवग्रहोवृष्टिप्रतिबंधेइतिनिपा
तिनः पत्ते सकर्णोमहीपतेः यौधिष्ठिरस्यपीडांचका
र अवग्रहइवकार्षिकस्य अवहेतुः सीतारूपणाव्यली
कादिति सीतायाहलपद्धतेः यत्तृपर्णात्तृणंत्वम्नष्का
त्वमितियावत् तद्व्यलीकात् अप्रियत्वादिति ॥ १३
नैर्ऋणयात्सव्यथेपात्रोः नरदेवमुपस्थितः तद्विराफ
लान्नोप्यापभ्रातावित्तस्यविक्रियात् ॥ १४ ॥ आ
त्तालक्ष्मणः नरदेवरामपस्थितः प्राप्तः किंभूतः शाको
द्विद्विजितः नैर्ऋणयांत्रिष्करणात्वेनसव्यथेपीडासहितं
तद्विराद्भ्रंद्रजितोवाणेनभ्रातारामवित्तस्यविक्रयाविका
रमापकिंभूतस्यापिअफल्गुनोपि अतस्यस्यापि पत्ते
भ्रातानफल्गुनोर्जुनोपि तद्विरावर्णागाचाचित्तस्यविक्र
याविकारमाप नरदेवंयुधिष्ठिरमुपगतः पात्रोः नैर्ऋ



एयान्निष्क्रमणात्वात्सख्यमिव फल्गुन्यां नक्षत्रे जातः
फाल्गुनः ॥ १४ ॥ कृतान्तपापयोरंतः प्रतियोगिविभी
षणः अपनिन्ये तयोः क्रमः कार्यज्ञो मन्युमूर्च्छनम् ॥
१५ ॥ विभीषणो रावणभ्राता तयो रामलक्ष्मणयोरंतःस्थि
तेमन्युमूर्च्छनं रोषव्याप्तिं अपनिन्ये नीतवान् किंभूतं प्रतियो
गिकर्तव्यप्रतिबोध कीदृशयोः कृतान्तपापयोः कृत
दोषयोः स कीदृशः कार्यज्ञः कार्यवेत्ता क्रमः पक्षमल्लः
पक्षे तयोः क्ष्माधिपार्जुनयोः अंतरवर्त्मंतरे रोषमूर्च्छ
नंकृत्स्नोवासुदेवः अपनिन्ये किंभूतः प्रतियोगिनां शत्रू
णां विभीषणो भयानकः रोषापनयनेनैवाग्रेकार्यसि
द्धिर्भविष्यतीति कार्यज्ञ इति ॥ १५ ॥ धूतप्रसादेन ततो
न्त्यपेणवधाय शत्रोः प्रहितः कनीयान् बलेन सार्धं वृ
हता बलिष्ठो रोद्धुं विघ्नमय्यसकृद्यतो भूत् ॥ १६ ॥
ततस्तदनंतरं कनीयान् भ्राता लक्ष्मणः शत्रोरिंद्रजितो
वधाय न्त्यपेण श्रीरामेण कृतप्रसादेन प्रसन्नेन बृहता
बलेन सार्धं प्रहितः साहितां शत्रूणां उद्यमं यज्ञं रो
गं रोद्धुमद्यतोऽभूत् वृत्तः बलवान् बलिष्ठः निकुम्भि
लायां हवनं कुर्वन्सन् सैन्येन लक्ष्मणेनेन्द्रजिद्रुद्ध
इति पक्षे न्त्यपेण राज्ञा क्ष्माधिपेण कनीयान्भ्राता
अर्जुनः शत्रोः कर्णस्य द्विषां शत्रूणां कर्णादीनां उद्यमं
रोद्धुमद्यतोऽभूत् ॥ १७ ॥ अनलबलहनुमत्कल्पि
तस्यन्दनश्रीर्दवदहनइवासौ वैरिकक्ष्यं विगाह्य प्र
तिहतवृषसेनादुष्करां चूर्णामैनं प्रसभमकृत बाहोः
विक्रमाणां निकर्षम् ॥ १८ ॥ असौ लक्ष्मणः प्रने
द्रजितं प्रसभमत्यर्थं बाह्वोर्विक्रमाणां निकर्षं कर्ष
णमकृतवान् कीदृशः अनलबलो यो हनुमान् त
स्मिन्कल्पितास्यन्दनश्रीः गमनलक्ष्मीः येन स तथा
हनुमत्प्रणामाद्भुतस्यार्थः वैरीशत्रुः कक्ष्यमिव वैरि

कक्ष्यं विगाह्य अवगाहयित्वा दवदहन इव दावाग्नि
रिव प्रतिहतो निराकृतो वृषदेंद्रो यया पर्वंशतायाः से
नाया आडम्बरस्य प्रपञ्चस्य चूर्णं चूर्णनं यस्य स तथा ॥
पक्षे असावर्जुनः प्रने कर्णी भुजयोः विक्रमाणां निकर्षं
कर्षणं प्राप्तवान् प्रहसन्नेवाकृत अनलबलेन हनुमता कल्पिता
स्यन्दनश्रीः रथशोभा यस्य स हनुमद्ध्वजधिष्ठानेन समन्वितरथ
कोऽति अर्जुनइत्यर्थः कपिकेतनत्वात् प्रतिहतो विनाशि
तो वृषसेनस्य कर्णपुत्रस्याडम्बराः चूर्णाय यस्य ॥ १८ ॥
अत्रांतरे पार्ष्णिमश्नुवन्निहत्ताविभीषणः संयति भीमसेनः
दुःशासनं वैरिबलं प्रमथ्य बलेन बाह्वोर्यमसाच्चकार
१९ ॥ अत्रांतरे विभीषणो रावणभ्राता बाह्वोर्बलेन प्रमथ्य वै
रिबलं शत्रुसैन्यं यमसात्यमस्य प्रदेशं चकार यमस्यायत्तं
कृतवानित्यर्थः सात्मसयदिति सातिः अश्नुवन् लक्ष्मणस्य
पार्ष्णिं पश्चात्सैन्यं शृण्वन् संयति संग्रामे भीमसेनाख्यस्तथा
कीदृशं तत् दुःशासनं दुष्टं शासनं आज्ञा यस्य तत् ॥
पक्षे अत्रांतरे भीमसेनः वृकोदरः दुःशासनं दुर्योधनानु
जं यमसाच्चकारेति अश्नुवन् अर्जुनस्य पार्ष्णिं शृण्वन् वि
भीषणो भयंकरः वैरिबलं शत्रुसैन्यं प्रमथ्य इति ॥ १९
अतिरक्तचरणान्निरोद्धुं आश्व कृद्धाभीषणाक्षदृप्तम्
तद्यातमालोकयरणे चरंतं सा हास्कृतांतमन्तत्स लोकः
२० ॥ लोको जनसंविभीषणं साहंकृतांतं यममेव म
त्वे तस्त्रस्त इत्यवानित्यर्थः तद्यातेन प्रकारेण रणे समरे
चरंतमवलोक्य दृष्ट्वा किंभिःशं भ्राम्यन्ती यादा तयाभी
षणेन ऊरुदृशो यस्य तद्या अन्नातीनां रक्तचरणेन रक्तस्व
वर्णेन अतिरोद्धुमत्यर्थं भयंकरं पक्षे लोकस्तं भीमसाहा
कृतांतं मन्तुं तस्य प्रमत्तं यमं जानाति स्म कथंभूतं अपातेः
दुःशासनस्य यकृत् आदि रक्तस्रवणे रक्तपाने जातं तेनाति
रौद्रं रूपं धृषमानम् ॥ २० ॥ ततो विभीषणमालोक्य रा



कर्ममहाजनाः राजदारोपरोधस्य फलं प्राप समनन्तर
२० ॥ महाजनः राजदारोपरोधस्य फलं प्राप समनन्तर
मनन्तरे स्म राज्ञो रामस्य दाराः सीता तस्या उपरोधस्य हर
णस्य फलमित्यर्थः तत्र रावणमेव विभीषणो विभीषण सं-
बोध्य आलोक्य पश्चे राज्ञो धार्तराष्ट्रस्य दाराः द्रौपदी-
तस्या उपरोधस्य केशाकर्षणस्य फलमेतदिति वैपादम
रणे तद्भीषणं भयंकरमारोक्यति ॥ २० ॥ तदा सौमि-
त्रिणा बाणैर्जिष्णुना स्तम्भवीकृतः श्रेगानामीश्वरः द्वय
मेघनादो रुधिरं दधौ ॥ २१ ॥ मेघस्येव नादो यस्य स मे
घनादः इन्द्रजित रुधिरं रोधं दधौ धृतवान् सकोहशः
सौमित्रिणा लक्ष्मणेन जिष्णुना जयनशीलेन बाणैः सं-
स्तम्भीकृतः स्तम्भं वितानीतः श्रेगानां हस्त्यश्वरथपदाना
नामीश्वरः स्तम्भन् द्रोणगच्छन् पक्षे तदानास्मिन्काले
श्रेगानामीश्वरो गराजा कर्णो रुधिरं दधौ स्तम्भन् संस्तम्भितः
रणासे स्तम्भ्यः मेघस्येव नादो यस्येति ॥ २१ ॥ बल
भावनिरन्तरा धरित्री गगनं निर्विवरं च दिलोकैः रजसापिहि
तेन तदन्तराले न विभागो निरणीयत त्रिलोक्याः ॥ २२ ॥
त्रिलोक्याः लोकत्रयस्य विभागो विभजनं पृथक्करणं
न निरणीयत न निरस्त्रीयत न निर्णीयते स्म तदेव विवृ-
णोति धरित्री पृथिवी सैन्यसमूहेन निरन्तरा अवकाशशू
न्या व्याप्तेत्यर्थः गगनमपि दिव्यलोकैः देवैः दर्शनार्थं
मागतैः निर्विवरं छिद्रशून्यं निरवकाशं तदनन्तरं द्यावा
पृथिव्योरन्तराले मध्यं रजसा सप्राप्य तेन रजसा पिहित
माच्छादितम् ॥ २२ ॥ अथ समनन्तरभितो जयन्त
सिंहनादैः परमपि च महोल्कापातैः पक्षैः कटाक्षैः
श्रवचनवचनबाणैर्मर्मभेदप्रवीणैः स्तदन्तदलितकायैः
सायकानां निकायैः ॥ २३ ॥ प्रथमतः स्तोलमाणैर्जि
तैरश्वैर्जनरायैर्योधैः अनन्तभिर्हृहङ्किः सिंहनादैः परस्पराञ्ज

घ्नतः शात्रवैरितैः निघ्नतः अपि च अनन्तरं महोल्कानां तद्
पवत्येरणवत् द्रुतैः कठिनैः कटाक्षैर्जघ्नतः अथवा
नेनन्तरं मर्मभेदप्रवीणैः समर्थैः वचोबाणैः जघ्नतः तदन्त
पश्चाद्दलितकायैर्विदारितशरीरैः सायकानां निकायैः
समूहैर्जघ्नतः ॥ २३ ॥ नभस्ततैर्मार्गणपातभीतैरप्स
रोगणैस्तत्र विलोकयद्भिः सविस्मयं साधु कृतं साधुवा
दैस्तयोः समानं समरं बभूव ॥ सविस्मयं साश्चर्यं यस्मात्
नभस्ततैर्गगनचारिभिः व्याप्तैः साधुवादो यत्र ताहृशं
मार्गणपाताद्बाणपतनाद्भयं प्राप्य समीपमुत्तहृत्य
त्यक्त्वा विलोकयद्भिरिति ॥ २४ ॥ निर्भिन्नधाराधरग
र्भनिर्यत्कीलालकल्लोलाच्छिन्नभूमिभागाः हृद्यं च गौरवि
शिखास्तदीयादिफणिविभेदमिव व्यतन्वत अनेनिष्पनि
स्म किंभूतानिः शोषेण भिन्नानां विदारितानां धाराधरा
णां मेघानां गर्भात्निर्यान्ति बहिर्भवन्ति यानि कीलालानि
जलानि तेषां कल्लोलाभिः कृत्रिमनदीभिः कलिताः सिक्ताः भू
मिभागा येते हृद्यं चरन्तो गच्छन्तः ॥ २४ ॥ हृष्टानेकप्रव
णवीरसमरश्रीभिः समं विचेरे रणाराद्धत्तनिनादेन ध्वनि
नानिर्णीयमानोऽन्तरम् भेरीध्वानभवद्व्याप्तिनमहादिक्कुं
जरदिक्कुंजरे याद्दर्शितपल्लपातनभयोः प्रेतदेवासुराः
२५ ॥ देवासुरास्तस्तते तयोर्लक्ष्मणेन्द्रजितोः कर्णार्जुन
योर्वा कद्व्यं पक्षपतिस्म विचेरे रणाद्वतितिर्यथा स्यात्
हृष्टानामनेकानां प्रवणानां जयप्राप्तानां वीराणां समरश्री
भिः संग्रामलक्ष्मीभिः समं सहनावेदन ध्वनिनानिर्णीय-
मानान्तरं यस्य तत्तया भेरीणां ध्वानेन झंकारेण भवद्
यं तेनाश्रितं महादिग्जं जयैश्वाहृष्यादिक्कुंजरा यत्र ॥
२५ ॥ विरचितनमतिरणाहिङ्कारबाणप्रेयाकारसहचरहरि
पाक्षिव्याहता वातिवाञ्छः रणभविल्वपक्षत्रमौलिरत्ना
पहारभुजगाङ्गवनसेहेसोकमप्याशुभंगम् ॥ २६ ॥

न्यपस्तद्भुः लक्ष्मणः स्तोकमपि स्वल्पमपि भंगं न सेहे ना
सोढवान् अविसमरभूमौ भुजगइव सर्पइव यथा सर्पो
मौलिरत्नस्य शिरोमणेरपहारं न सहते द्विपादस्था
णोऽरिणा इंद्रजिता तेकिंश्रुतेन हारवाणस्य प्रयोक्ता प्र
योजकेन सहचारिणा मकृयायिना हरीणां वानराणां श
क्तिभिः पराक्रमैः व्याहता प्रतीतः वा रक्षाजयकांक्षायेन
सः पक्षे न्यपस्तन्त्रवर्जुनः स्तोकमपि मौलिरत्नापहारं
किरीटापनयनं न सेहे आश्रुपश्रीत्रिभंगोयस्य नत अरि
णाकर्णेन विरचितं कीदृशेन अहिर्विचक्रोरो बाणः प्रार
तस्य प्रयोक्ता प्रयोजकेन कर्णेन किल स्वीयहृणो स्थितो
विजयनामा बाणोर्जुनवधाय रक्षितइति ॥ २२ ॥ आ
श्रुरोषवपर्वतिनाम ग्नाज्यानिनादक्रान्ततीव्रभर्मना:
प्रतिघातिविशिखाः प्रतेनिरेकर्णकुण्डलविच्छेदनोत्क
टाः ॥ २३ ॥ अभ्रुनालक्ष्मणेनाश्रुपश्रीत्रिरोषवपाव
र्तिनाक्रष्टेन प्रत्यपाति अपातेरभिमुखतालक्ष्मीकृत्य वि
शिखाः बाणाः प्रतेनिरे विस्तारिताः क्षिप्ताइत्यर्थः अभि
प्रतिआवादभिमुख्यमइत्यव्ययीभावः कीदृशाः ज्यानि
नादेन धनुर्गुणशब्देन टंकारेण क्रान्तातीव्ररभसभर्मनै॰
नाधर्षणायेस्ते कर्णयोः कुण्डलविच्छेदनेनोत्कटास्ती
क्ष्णाः ~~तीक्ष्णाः~~ इति पक्षे अभ्रुनार्जुनेन कर्णस्यारा
धेयस्य कुण्डयोर्विच्छेदनेनोत्कटास्तीक्ष्णाः तुल्यमन्यत्
२४ ॥ शस्तचक्रस्यधरया निषण्णस्यन्दनापदः रणकर्ममः
हत्त्वो अनौ सोढनरदेवजः ॥ २५ ॥ नरदेवजः लक्ष्म
णः पौलस्त्यिंद्रजितो रणकर्ममहत् नासोढ न सर्षितवा
न् किं भूतस्य शस्तचक्रस्य शस्तसैन्यधरया भूम्या निषण्ण
न्नास्यन्दनस्य गमनस्यापद्विपर्यस्य तस्येति पक्षे नरदे
वजः अर्जुनः पार्थः कर्णस्यधरया पृथिव्या शस्तचक्रस्य
शस्तरथचक्रभ्रांतस्य धरयैव निषण्णस्यन्दनस्याप॰


दस्य ॥ २६ ॥ ततः प्रतीतो जगतीन्द्रहन्तुः समाशिमिश्र
न्नमवार्णवस्य संधाय संधास फलीकरिष्यन् कर्णान्तसज्जं प्राव
मुक्तसज्जं ॥ २७ ॥ जगतीन्द्रस्य पृथ्वीपालस्य दशरथस्य हन्तुः
लक्ष्मणः प्राग्मुक्तसज्जत्वमकृवान् कर्णान्तेकर्णपर्यन्ते सज्ज्याः क
र्णान्तसज्जः तं संधाय संधानं कृत्वा धनुषीतिविशेषः संधां प्रति
ज्ञां सफलीकर्तुमिच्छन् ततोनंतरं प्रतीतः समवार्णवस्य संग्रा
मसमुद्रस्य समाशिमिच्छन् सन्नद्धे संभृते सज्ज इति प्रकाशः ॥
पक्षे जगतिप्रतीतः इंद्रहन्तुरर्जुनः कर्णस्य राधेयस्यांतोविना
शः तदर्थं सज्जं संधायेति तुल्यमन्यत् अतः स्वहृपे नाप्तेनास्त्री
शेषेति केचिद्धितिमेदिनीकरः पृथग्जेत्वसतेकर्णः स्ववर्णे
लोहन्तावपि ॥ २८ ॥ उच्चदंजलिकेनासो नानाविक्रमशोभि
तः विद्धिंविशिखेन त्रालिसयकस्यनाकरोत् ॥ २९ ॥
अस्तो लक्ष्मणः कस्य विस्मयं न करोत् अपितु सर्वस्यकरोत्
वैरस्य शत्रोर्विद्धं विशिखेन घ्नन् निवारयन् उच्चलेनांजलिकेन
बाणेन नानाविक्रमेण शोभितः कांतियुक्तः पक्षे अस्तावर्जु॰
नः पोसंक्षमानम् ॥ ३० ॥ क्षिप्रं क्षिप्तभ्रुकुटिभुजगाभीष्मभा
लं प्रवृत्ता व्यस्तापांगं विशिखविशिखयास्ताकमेवारिकाण्डे नूनं
तेन प्रसभमिषुणा भूषयामास भूमिं छिन्नेर्द्धं पूर्वमपानके॰
ष्ठांकारमेव ॥ ३१ ॥ सजिस्तु अजेनयनशीलः लक्ष्मणोर्जु
नोवा तेनेषुणा बाणेन भूमिं भूषयामास अलंकरोतिस्म द्वेषुः
शत्रोर्मौलिंच अपानकेकश्चमौलिः कोइंकारोयेन तत्तथा प्रसभम॰
स्वर्थं कीदृशं क्षिप्रं शीघ्रं क्षिप्ताभ्रुकुटिरेव भुजगस्तेनभीष्मा
भयंकरो भालोललाटं यस्य तत्प्रवृत्ताव्यस्तामलोन्यस्तापांगोनया
तेनेवप्रांते विशिखविशिखयास्ताकं नूनं निश्चितमपि अरिक
ण्टे शत्रुकण्ठेन्यस्तनेत्रप्रांतमित्यर्थः लूनमितिपाठः तत्र ते
न विशिखेन लूनं छिन्नमिति गमकत्वादिनी सपल्लायत सं
ग्रामात्सापरेषां पताकिनी परेषां शत्रूणां पताकिनी सेना
संग्रामात्प्रपलाय परा जाता अंगानां सेनानां भर्तुः इंद्रजितः

२+ द्वेषुर्मौलिं भूमिं च भूषयामासेति ॥ ३१ ॥ अंगभर्तुः शिरश्छिन्न+२

रा.च.
पा.
१९

शृंगराजस्य कर्णस्य वा शिरश्छिन्नमिति गद्गद्भाषिणी यो
केन भयेन गद्गदं यथा स्यात् एवंभाषणशीलेति ॥ २२ ॥
समंहस्याद्रिजयिनं समेतस्स भूपतिरथ तरमभ्यनन्दत् उपे
न्द्रमग्रे प्रणतं महेन्द्रः पुरेव वैरोचनिभंगहृष्टः ॥ २३ ॥
स भूपतिः रामो युधिष्ठिरो वा भ्रातरं लक्ष्मणं वा अर्जुनं वा स
मं तुल्यमभ्यनन्दत् सोऽपि स सह्याद्रिभिः विभीषणादि
भिः स्त्रीहस्सादिभिर्वा सह समेतमागतं वा महेन्द्र इव यथा
पुरा पूर्वं महेन्द्रः शक्रः वैरोचनेः बलिदानवस्य भंगेन हृष्टः
हर्षयुक्तः तमग्रे विल्सु मग्रे प्रणतमभिनन्दितवानिति ॥ २४
चमूपतिर्मारुतिरश्विनन्दनौ गदाधरः पुण्यजनेश्वरस्तथा
पुनः स्फुरत्कीर्तिधनंजयं प्रभोस्तस्सहराजेन समं प्रतस्थिरे ॥
२४ ॥ एते सर्वे तेन लक्ष्मणे प्रतस्थुः किंभूतं प्रभोः रामस्य
पुरोऽग्रे स्फुरंती कीर्तिरेव धनं यस्य तम् तथाजयंजयफके
केते इत्याह प्लवंगपतिः सेनापतिः नीलः मारुतिः हनूमान् अ
श्विनीकुमारपुत्रौ वानरविशेषौ मैन्दद्विविदौ गदाधरः
गदायुधः पुण्यजनेश्वरः राक्षसपतिर्विभीषणः स्फुरद्रा
जेन समं जांबवता सुग्रीवेण सह एते प्रभोः युधिष्ठिर
स्याग्रे तं धनंजयं अर्जुनं प्रतस्थुः स्तवंतिस्म कथंस्फुर
त्कीर्तिर्यथा तत् केते इत्याह चमूपतिः पाण्डवसेनापतिः धृ
ष्टद्युम्नः मारुतिः भीमः अश्विनन्दनौ नकुलसहदेवौ पु
ण्यापवित्रा ये जनाः तेषामीश्वरः श्रीकृष्णः कथंभूतो गदाध
रः गदो नाम भ्राता अधरः कनिष्ठो यस्य तं कीदृशं स्फुरद्रा
जेन चंद्रमसा तुल्यम् स्फुरद्भिः एवं ते भेदे स्याद्गुल्लूके पोणाके
पुमान् कृतभेदे त्र्यलिंगे स्यान्नक्षत्रे पुनपुंसका मितिमेदि
नीकरः ॥ २४ ॥ रणातिभूमिः कटकद्वये सा पौकाप्रह
र्षोदभजमानम् निवेशयोर्वाजिकेवराणां निद्राः प्रबोधो
कुमारपन्निवेव २५ ॥ समराख्यातिभूमिः पराक्रमाकटक
द्वये रामरावणयोः दुर्योधनयुधिष्ठिरयोर्वा पौकाव्रहर्षे

स्वतौ समानं तुल्यं कालमभजत् सिषेवे यथा रात्रिर्युगप
देकधा वाजिनां अश्वानां वृषभाणां च निवेशयोः ॥ २५ ॥
तदाहवे नीलकवस्य सूनोर्नक्तंचरेभ्यो निधनं निशम्य सुश्रो
चवाज्ञा वक्रधार्तराष्ट्रः स्वचकुर्नयस्यानुभवन्फलानि ॥
२६ ॥ तदा तस्मिन्काले राजा रावणः सुशोच अशुचत् नी
लकवस्य अग्रदूतस्य सूनोः मेघसेनाख्यस्य निधनं मरणं निशम्य
केभ्यः नक्तंचरेभ्यो राक्षसेभ्यो राजा कीदृशः वक्रपा भ्रांतंपीडि
तं राष्ट्रं येन सः एवं च स्वकुर्नयस्यापि फलान्यनुभवन्निति ॥ प
क्षे राजा धार्तराष्ट्रो दुर्योधनः सुशोच नीलकस्य सूर्यस्य सूनोः
कर्णस्य निधनं मरणं नक्तं रात्रौ चरेभ्यः प्रणिधिभ्यः निशम्य शो
चत्तल्यम् ॥ २६ ॥ स्वामिना दशमुखेन नोदिता दिग्गजाव
निरजसा निरुन्धती प्रत्ययाति विचचाल वाहिनी वारणादप
रपाल्यनायका ॥ २७ ॥ वाहिनी रावणवाहिनी प्रत्ययाः
तिपादुमस्त्वं विचचाल कीदृशी स्वामिना दशमुखेन रा
वणेन नोदिता प्रेरिता रजसा दिग्गजावनि रुन्धती आच्छा
दयंती वारणाद्यानविशेषात् अपरेषां पाल्यश्रेष्ठा अति
दुःखकारिकेत्यर्थः पक्षे दुर्योधनवाहिनी प्रत्ययाति विषा
णाल कथंभूता स्वामिना दुर्योधनेन मुखेन प्रेरिता तथा दि
शादिग्गजावनि रुन्धती वारणात् हस्तिनः हस्तिनमारुह्ये
त्यर्थः अपरः शाल्यो मद्राधिपो नायकः सेनापतिः यस्याः
सा ॥ २७ ॥ ततः स्थितव्यूहमुखास्समूहता स्थिरप्रभा
वानरनाथसैनिकाः समभ्ययुर्हन्तुमरातिमण्डलं निषाध
कां स्थमणोरिवांपवः ॥ २८ ॥ अनंतरं नरनाथसैनिकाः
रामसैनिकाः युधिष्ठिरसैनिकावा अरातिमण्डलं शत्रु
समूहं हन्तुं समभ्ययुः आगच्छंतिः स कीदृशाः चमूहता
नीलेन धृष्टद्युम्नेन वा स्थितव्यूहमुखाः स्थितं व्यूहः सम्मू
हस्तस्य मुखं येषां ते इति यमणोः सूर्यास्त्राः वाकिरणानिषा
कारमिवनाशयंति स्मेत्यर्थः ॥ २८ ॥ द्रुतदाविरलधूलि



ध्वांतस्फुटांबरांतं विघटितसुरलोकद्वारपक्षकवाटं सम-
दविबुधनारीनेत्रादत्तानुयात्रं त्वरितविविधयोधं कटुमासी-
दुजिन्योः ॥ ५९ ॥ ध्वजिन्योः रामरावणसेनयोः कीदृशं
दुर्योधनसेनयोर्वा कटु यथा स्यात्तथा बभूव किं विशिष्टं ध्व-
नाविरलेन निविडेन धूलिनेव ध्वांतेन स्फुटमम्बरांतं यत्र त-
द्वदविरलभूमीनिपातांतवं तथा विघटितं स्वर्लोकस्य द्वा-
रपक्षयोः कवाटं यत्र यद्वा द्वारपाल एव कवाटं च विघटि-
तं स्वर्लोकस्य द्वारपाल एव कवाटं यस्मिन् समदायाः विबुध-
नार्यः स्वर्गस्त्रियाः तासां नेत्रैर्दत्ता अनुयात्रा पश्चाद्गमनं
यत्र द्रवंतो विविधानेकविधा योधा यत्र समालापस्तांते
वा द्वौ वद्भागद्रुमाद्रयोरिति मेदिनीकरः ॥ ५९ ॥ अभि-
पात्रुं समापतन्नितांतं पृतनानांपतिरेधितानननस्त्रीः रजसा
पिहितांशुमद्रराजस्य गायन्व्योम गभीरवीरनादैः ॥ ६०
पृतनानां पतिः सेनापतिः रावणः रजसा पिहितांशुं अभिपात्रु-
रिपुं लक्षीकृत्य समापतन् नितान्तं अतिशयेन एधिता उप-
चिता आननस्त्रीः मुखशोभा यस्य रजसा रेणुना पिहितां-
शुमान् पिहितः सूर्यो यथा स्यात् एवं गभीरैर्वीराणां नादै-
र्व्योमने स्थगयन् पिदधन् पक्षे मद्रराजः मद्राधिपः शल्यः
पौत्ररभिमुखं समापतन् अपरस्तु सेनानांपतिः स्वामी र-
जसा पिहिताः अंशवः यत्र तत् पिहितांशु इति क्रियाविशे-
षणम् मद्रराजस्य गायन् इत्यत्र खर्परे विसर्जनीयस्य-
लोपो वक्तव्य इति विसर्जनीयस्य लोपः ॥ ६० ॥ जनितनवा-
रवानरकुंजरदनत्ररंजितदिक्करिदीर्घकरं प्रतिभटाव-
टशल्यमलोकहापरबलमनुजेश्वरमाह्वणोत् ॥ ६१ ॥
परसेना रावणसेना मनुजेश्वरं राममसावाह्वणोत् आह्वणोति
स्म जनिताः पांसवानां पाठाः यत्र सा नराणां कुंजराणां च र-
तजेन क्रोधितेन रंजिता दिक् यथा विदिवौकसां देवानां-
प्रतिभटा पवाक्यदानिस्त्रप्रदेशा यत्र शल्यानामह्नविशेषा

णां पांसुभिर्वा मुखं यस्या सा हृष्टीनडूटापवंशाच पक्षे
परचमूः दुर्योधनसेना मनुजेश्वरं कीदृशं प्रतिभटाना-
मवटघ्रात्कान्दनं यस्मादीदृशः शल्यो मद्राधिपो वा येय-
स्मामीदृशीनड्रावोति ॥ ६२ ॥ नरेश्वरशिरश्छिन्नना-
नावीरशिरःतल्पनम् भूभारभरसंहातिप्रधनं तत्र पप्रथे
६२ ॥ तत्र प्रधनसंग्रामः पप्रथे तस्मात् किंभूतं भूवो भारस्य
यो भारः गौरवं तत्संहर्तृ शीलं यस्य तत् नरेश्वरस्य रामस्य श-
रैश्छिन्नानि यानि नानावीराणां शिरांसि तैः विस्तृतं व्याप्तं
पक्षे नरेश्वरः कीदृशः शोषितं तल्पम् ६२ ॥ रथाश्व-
मातंगनिरंतराणि हत्वा बहूनि द्विषतां बलानि तूणेन-
धर्मप्रसवः क्षितीशः शाकुन्याम्निने सहरति स्म शल्यम् ॥
६३ ॥ क्षितीशः रामः शाक्या सामर्थ्येनान्वितेः पृथिव्यां-
शल्यव्यथा मुद्रति स्म द्विषतां शत्रूणां रावणानां बहू-
नि बलानि सैन्यानि हत्वा विनाश्य कथंभूतानि रथैरश्वैः
मातंगैः करिभिर्मातंगैर्निरंतरालानि निरवकाशानि-
धर्मप्रसवो धर्मप्रधानाः धर्मस्य प्रसवः अत्यन्ति येषां पक्षे
धर्मप्रसवः धर्मात्मजः कीदृशः तूणेन शाक्या शस्त्रविशे-
षेण शल्यं मद्रराजं मुद्रति स्म हतवान् शोषितंतल्पम् ॥
६४ ॥ विननाप विहूपात्त्स्तीक्ष्णतापपरितापितः यथावि
पक्षः शाकुनिः सहदेवनिपीडनैः विहूपात्तोनामराक्षसो-
विननाप नपपातिस्म किंभूतः तीव्रस्तापो यस्य सस्तीव्रता-
पो रामस्तेन निपातितः विपक्षः पाक्षुः यथा शकुनिः पक्षी
देवनिपीडनैः मेघनिपीडनैः सह विपक्षः विगतपक्षः प-
